श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते दशमस्कन्धे

# ॥ श्री रुक्मिणीस्तवनम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री रुक्मिणीस्तवनम् ॥

श्रीरुक्मिण्युवाच

नन्वेवमेतदरविन्दविलोचनाह
    यद्वै भवान् भगवतोऽसदृशी विभूम्नः।
क्व स्वे महिम्न्यभिरतो भगवांस्त्र्यधीशः
    क्वाहं गुणप्रकृतिरज्ञगृहीतपादा ॥ 1 ॥

सत्यं भयादिव गुणेभ्य उरुक्रमान्तः
    शेते समुद्र उपलम्भनमात्र आत्मा।
नित्यं कदिन्द्रियगणैः कृतविग्रहस्त्वं
    त्वत्सेवकैर्नृपपदं विधुतं तमोऽन्धम् ॥ 2 ॥

त्वत्पादपद्ममकरन्दजुषां मुनीनां
    वर्त्मास्फुटं नृपशुभिर्ननु दुर्विभाव्यम्।
यस्मादलौकिकमिवेहितमीश्वरस्य
    भूमंस्तवेहितमथो अनु ये भवन्तम् ॥ 3 ॥

निष्किञ्चनो ननु भवान् न यतोऽस्ति किञ्चिद्
    यस्मै बलिं बलिभुजोऽपि हरन्त्यजाद्याः।
न त्वा विदन्त्यसुतृपोऽन्तकमाढ्यतान्धाः
    प्रेष्ठो भवान् बलिभुजामपि तेऽपि तुभ्यम् ॥ 4 ॥

त्वं वै समस्तपुरुषार्थमयः फलात्मा
    यद्वाञ्छया सुमतयो विसृजन्ति कृत्स्नम्।

तेषां विभो समुचितो भवतः समाजः
पुंसः स्त्रियाश्च रतयोः सुखदुःखिनोर्न ॥ 5 ॥

त्वं न्यस्तदण्डमुनिभिर्गदितानुभाव
आत्माऽऽत्मदश्च जगतामिति मे वृतोऽसि।
हित्वा भवद्भ्रुव उदीरितकालवेग -
ध्वस्ताशिषोऽब्जभवनाकपतीन् कुतोऽन्ये ॥ 6 ॥

जाड्यं वचस्तव गदाग्रज यस्तु भूपान्
विद्राव्य शार्ङ्गनिनदेन जहर्थ मां त्वम्।
सिंहो यथा स्वबलिमीश पशून् स्वभागं
तेभ्यो भयाद् यदुदधिं शरणं प्रपन्नः ॥ 7 ॥

यद्वाञ्छया नृपशिखामणयोऽङ्गवैन्य -
जायन्तनाहुषगयादय ऐक्यपत्यम्।
राज्यं विसृज्य विविशुर्वनमम्बुजाक्ष
सीदन्ति तेऽनुपदवीं त इहास्थिताः किम् ॥ 8 ॥

कान्यं श्रयेत तव पादसरोजगन्धम्
आघ्राय सन्मुखरितं जनतापवर्गम्।
लक्ष्म्यालयं त्वविगणय्य गुणालयस्य
मर्त्या सदोरुभयमर्थविविक्तदृष्टिः ॥ 9 ॥

तं त्वानुरूपमभजं जगतामधीशम्
आत्मानमत्र च परत्र च कामपूरम्।
स्यान्मे तवाङ्घ्रिररणं सृतिभिर्भ्रमन्त्या
यो वै भजन्तमुपयात्यनृतापवर्गः ॥ 10 ॥

तस्याः स्युरच्युत नृपा भवतोपदिष्टाः
    स्त्रीणां गृहेषु खरगोश्वबिडालभृत्याः।
यत्कर्णमूलमरिकर्षण नोपयायाद्
    युष्मत्कथा मृडविरिञ्चसभासु गीता॥ **11** ॥

त्वक्श्मश्रुरोमनखकेशपिनद्धमन्तः
    मांसास्थिरक्तकृमिविट्कफपित्तवातम्।
जीवच्छवं भजति कान्तमतिर्विमूढा
    या ते पदाब्जमकरन्दमजिघ्रती स्त्री॥ **12** ॥

अस्त्वम्बुजाक्ष मम ते चरणानुराग
    आत्मन् रतस्य मयि चानतिरिक्तदृष्टेः।
यर्ह्यस्य वृद्धय उपात्तरजोऽतिमात्रो
    मामीक्षसे तदु ह नः परमानुकम्पा॥ **13** ॥

॥ इति श्री रुक्मिणीस्तवनं समाप्तम्॥